99. कच्छपस्य नाम किमासीत् ?

(1) कम्बुग्रीव: (2) चिरग्रीव: (3) घटग्रीव: (4) सुग्रीव:

**अधोलिखितान् श्लोकान् पठित्वा तदाधारितप्रश्नानां (100-105) विकल्पात्मकोत्तरेभ्य: उत्तरं चित्वा लिखत।**

गुणवत्तरपात्रेण छाद्यन्ते गुणिनां गुणा:।
रात्रौ दीपाशिखाकान्तिर्न भानावुदिते सति।। (1)
ना भक्ष्यं भक्षयेत्प्राज्ञ: प्राणै: कण्ठगतैरपि।
विशेषान्तदपि स्तोकं लोकद्वयविनाशिकम्।। (2)
बहूनामप्यसाराणां समवायो हि दुर्जय:।
तृणैरावेष्ट्यते रज्जुर्येन नागोऽपि बद्धय्ते।। (3)
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्।। (4)
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।
पय: पानं भुजङ्गानां केवलं विषवर्धनम्।। (5)
मातृवत्परदाराणि परद्रव्याणि लोष्ठवत्।
आत्मवत्सर्वभूतानि वीक्ष्यन्ते धर्मबुद्धय:।। (6)

100. धर्मबुद्धय: परद्रव्याणि कथं वीक्ष्यन्ते ?

(1) आत्मवत् (2) रत्नवत् (3) अमृतवत् (4) लोष्ठवत्

101. किं दुर्जय: भवति ?

(1) बहु–मूर्खाणां समवाय: (2) बहु–साराणां समवाय:
(3) बहु–ज्ञानानां समवाय: (4) बहु–असाराणां समवाय:

102. मूर्खाणां उपदेश: किं जनयति ?

(1) ज्ञानम् (2) कोप: (3) सुखम् (4) दु:खम्

103. कस्यार्थे पृथिवीं त्यजेत् ?

(1) कुलस्यार्थे (2) धनस्यार्थे (3) आत्मार्थे (4) मित्रस्यार्थे

104. क: कथमपि अभक्ष्यं न भक्षयति ?

(1) प्राज्ञ: (2) मूर्ख: (3) राजा (4) सज्जन:

105. गुणिनां गुणा: केन छाद्यन्ते ?

(1) विदुषा (2) गुणवत्तरेण (3) मूर्खेण (4) राज्ञा

106. सामग्रीणां प्रामाणिकताया: क: आशय: ?

(1) बालकै: गृहात् आनीता सामग्री
(2) कक्षाकृते अध्यापकेन लिखिता सामग्री
(3) प्राधिकारिजनै: विकसिता, लिखिता सामग्री
(4) यथार्थलोक–वस्तु–अधिकृत्य विकसिता लिखिता सामग्री

**107.** पञ्चमकक्षाया: विद्यार्थी, अपर्णा जानाति यत् श्रवणान्तरे वाच: श्रव्यस्य व अर्थं अवगन्तुं ध्वनि-पद-वाक्यविशेयस्य श्रवणं सन्निविष्टं भवति। सा श्रवण-अधिगमहेतो: किं प्रविधिं स्वीकरोति?

(1) न खलु अधोगामि उपागम: न उपरिगामि उपागम:

(2) अधोगामि-उपागम: (Top-down approach)

(3) उपरिगामि उपागम: (Bottom-up approach)

(4) उभौ अधोगामि-उपरिगामि-उपागमौ

**108.** भाषा अधिगमे, तन्त्रबद्ध सामर्थ्य (Systemic Competence) किं कथ्यते?

(1) सर्वमानवेषु बहुभाषाणां व्यवस्था: प्राप्यन्ते।

(2) भाषा एकं तन्त्रवत् वर्तते इति अवबोध:, व्यवहारश्च।

(3) भाषायां व्याकरण-व्यवस्था भवति इति अवबोध: व्यवहारश्च।

(4) सर्वभाषासु एका समानसंरचना व्यवस्था प्राप्यते इति अवबोध:।

**109.** अत्र एक: पाठ: उदाहृत:। अनेन पाठेन का भाषा पर्युक्ति: (Language register) सम्बद्धा?
भारतीय-संविधान-अनुसारेण प्रत्येकं व्यक्ति: समान: अस्ति। अस्य आशय: भवेत् यत् देशे प्रत्येकं व्यक्ति: नर: वा नारी वा, सर्वजाति-धर्म-जनजाति-विविध शैक्षिक-आर्थिक-पृष्ठभूमिसम्बद्ध: समान: एव मन्यते। नैतस्य अभिप्राय: यत् असमानता समाप्ता जाता, नैवम्। तदपि लोकतान्त्रिक भारते सर्वजनानां समानताया: सिद्धान्त: स्वीक्रियते।

(1) वैज्ञानिक-पर्युक्ति (Scientific Register)

(2) राजनीतिक-पर्युक्ति (Politic Register)

(3) समाज-विज्ञान-पर्युक्ति (Social Science Register)

(4) विधिक-पर्युक्ति (Legal Register)

**110.** षष्ठकक्षाया: एका शिक्षिका स्वछात्रान् तेभ्य: पठिष्यमाणपाठं तेषां पूर्वज्ञान-अनुभवाभ्यां सह संयोजयितुं कथयति। सा स्वपाठं पाठयितुं पूर्वमपि पाठे विद्यमानानि चित्राणि अवलोकयितुं कथयति। सा स्वछात्रै: किं कर्तुम् इच्छति?

(1) चित्राणां अवबोधने साहाय्यं प्रयच्छति (2) चित्रमाध्यमेन कथाया: प्रत्यक्षीकरणम्

(3) चित्राणां प्रशंसनम् (4) पठ्यमानपाठमुद्दिश्य पूर्वानुमानकरणम्

**111.** छात्रै: सम्पादित-अधिगम-उदाहरणानां सतत्-संसूचनम् (Continuous record) किं कथ्यते?

(1) नैदानिक-परीक्षणम् (Diagnostic test)

(2) पत्राधानम् (Portfolio)

(3) सतत्-अवबोध्य-आकलनम् (Continuous Comprehensive Assessment)

(4) दक्षता-आकलनम् (Proficiency Assessment)

**112.** अधोलिखितेषु किं ग्रहण-कौशलानि (Receptive Skills) इति ज्ञायते?

(1) श्रवणं, पठनं च (2) श्रवणं, लेखनं च (3) पठनं, संभाषणं च (4) संभाषणं, लेखनं च

**113.** सेवायोजनाय विदेशान् गन्तुकामा: बहव: भारतीया: तद्देशानां भाषा: शिक्षन्ते। भाषा शिक्षणस्य इयं उत्प्रेरणा का कथ्यते?

(1) न खलु समेकिता-उत्प्रेरणा, न करणमूला-उत्प्रेरणा

(2) समेकितां (Integrative) करणमूला (instrumental) च उत्प्रेरणा

(3) समेकिता-उत्प्रेरणा

(4) करणमूला-उत्प्रेरणा

**114.** अधोलिखितेषु का भाषा श्रेण्यभाषा (Classical Language) नास्ति ?

(1) हिन्दीभाषा (2) तमिलभाषा (3) संस्कृतभाषा (4) तेलुगुभाषा

**115.** वैदेशिक-भाषाध्ययनमधिकृत्य राष्ट्रीय-शिक्षा-नीति 2020 विषये अधोलिखितेषु किं सत्यं न अस्ति ?

(1) अतिरिक्त विकल्परूपेण फ्रेन्चभाषाया: गणना अनुशंसितभाषाणां मध्ये भवति।

(2) द्वितीयअवस्थायां (Secondary Stage) अतिरिक्तविकल्परूपेण वैदेशिकभाषाणां अध्ययनम्।

(3) त्रिभाषासूत्रमध्ये एका भाषा इति वैदेशिकभाषाणां अध्ययनम्।

(4) त्रिभाषासूत्रमध्ये अधीतभाषासु काऽपि वैदेशिकभाषा सन्निविष्टा नास्ति।

**116.** अधोलिखितेषु किं 'भाषामुद्दिश्य ज्ञानक्रियां' संकेतयति ?

(1) प्रविधिगतसामर्थ्यम् (Strategic competence)

(2) निर्णयात्मकं ज्ञानम् (Declarative Knowledge)

(3) प्रक्रियात्मकं ज्ञानम् (Procedural Knowledge)

(4) व्याकरणात्मकं ज्ञानम्

**117.** षष्ठकक्षाया: एक: अध्यापक: सम्भाषण-गतिविधिदृष्ट्या अधोलिखितं कार्यम् आयोजयति –
मरुस्थलं तद्जलवायुस्थितीन् च उद्दिश्य पञ्चवाक्यानि वदतु। किमियं कार्यं समीचीनं वा असमीचीनम् ?
विकल्पेषु स्वमतं चिनुत, कारणं च प्रयच्छत –

(1) इदं तु असमीचीनं कार्यं यतोहि अस्मिन् सन्दर्भाभाव: दृश्यते यत: मरुस्थलमुद्दिश्य संभाषणाय निविष्टीनां अभाव: प्राप्यते।

(2) इदं एकं समीचीनं कार्यं यतो हि छात्रै: पूर्वमेव स्वभूगोलकक्षायां मरुस्थल-विषये अधीतम् अत: ते एतस्मिन् विषये लेखितुं शक्नुयु:

(3) इदं समीचीनं कार्यं यतो हि इदं छात्रान् किंचित विषयमुद्दिश्य यथा मरुस्थलं, वक्तुं प्रवर्तते।

(4) इदं तु असमीचीनं कार्यं यतोहि केचिद् छात्रा: मरुस्थलविषये न अधीतवन्त:।

**118.** कस्याश्चिद् भाषाया: उपभाषा (Dialect) विषये अधोलिखितेषु किं सत्यम् ?

(1) एकभाषाया: विभिन्ना: सामाजिक-समूहा: भिन्ना: उपभाषा: वक्तुं शक्नुयु:।

(2) उपभाषायां क्षेत्रगतभिन्नता प्राप्यते।

(3) एकस्या: भाषाया: विभिन्न-उपभाषाणां भाषिण: अपरउपभाषाभाषिणं सञ्जानीते।

(4) उपभाषा एक: महत्तर: कोटि: भाषा तु एक: लघुतर: कोटि:।

**119.** अधोलिखितेषु किं समेकित-अधिगम-कौशलानि संवर्धयति ?

(1) आलेख-लेखनम् (Writing an article) (2) पात्राभिनय: (Role-Play)

(3) प्रदत्तकार्यम् (Assignment) (4) परियोजना-कार्यम् (Project work)

**120.** सन्दर्भ-व्याकरणशिक्षण-क्रमे (Context grammar teaching) अधोलिखिता: पद्धतय: किं कथ्यन्ते ?
सन्दर्भेषु भाषा-सामग्र्या: परिचय: छात्रेषु भाषासामग्री: प्रति अवधानता-जननं, तेषु वास्तविक-जीवन-सन्दर्भे प्रयोगाय सामर्थ्य-निर्माणं, अन्वेषणपूर्वकं रूपं प्रति छात्राणाम् अवधानाकर्षणम्।

(1) चैतन्य-उद्बोधनम् (Consciousness raising)

(2) रूपरेखा-निर्माणम् (Creating a Schema)

(3) निर्गमनात्मक-विधि: (Deductive method)

(4) अन्वेषणात्मक-प्रविधि: (Discovery method)

**126.** 'नृपते:' इति पदे का विभक्ति: ?

(1) प्रथमा (2) षष्ठी (3) द्वितीया (4) सप्तमी

**127.** 'भ्राम्यन्' इति पदे प्रयुक्त कृदन्तप्रत्ययं चित्वा लिखत।

(1) शतृ (2) क्त्वा (3) तुमुन् (4) शानच्

**128.** 'दृष्टवन्त:' इति अर्थे प्रयुक्तं क्रियापदं चित्वा लिखत।

(1) वीक्षाचकार (2) गतवन्त: (3) हसितवन्त: (4) वीक्षाचक्रु:

**अधोलिखितं गद्यांशं पठित्वा तदाधारित प्रश्नानां (129-135) विकल्पात्मकोत्तरेभ्य: उचिततमम् उत्तरं चित्वा लिखत।**

कश्चिद् गोमायु: नाम शृगाल: क्षुत्क्षामकण्ठ इतस्तत: आहारक्रियार्थं परिभ्रमन् वने सैन्यद्वयसङ्ग्रामभूमिम् अपश्यत। तस्यां च दुन्दुभे: पतितस्य वायुवशाद् वल्लीशाखागृहैर्न्य मानस्य शब्दम् अशृणोत्।

अथ क्षुभितहृदय: चिन्तयामास – अहो, विनष्टोऽस्मि तद्यावन्नास्य प्रोच्चारितशब्दस्य दृष्टिगोचरं गच्छामि तावदन्यतो व्रजामि। अथवा नैतद्युज्यते सहसैव। तत् तावज्जानामि कस्थायं शब्द:। इत्थं धैर्यमालष्य विमर्शयन यावन्मन्दं-मन्दं गच्छति तावद दुन्दुभिम् अपश्यत्। स च तं परिज्ञाय समीपं गत्वा स्वयमेव कौतुकादताडयत्। भूयश्च हर्षादचिन्तयत् – अहो! चिरादेतदस्माकं महद् भोजन-मायतितम्। तन्नूनं प्रभूतमांसमेदाऽसृग्भि: परिपूरितं भविष्यति।

तत: परुषचर्मावगुष्ठितं तत्कथमपि विदार्य एकदेशे छिद्रं कृत्वा संहृष्टमना मध्ये प्रविष्ट:। परं चर्मविदारणतो दंष्ट्राभङ्ग: समजनि। अथ निराशीभूत: तद् दारुशेषमवलोक्य श्लोकमेनमपठत् – पूर्वमेव मया ज्ञात पूर्णमेतद्धि मेदसा अनुप्रविश्य विज्ञातं यावच्चर्मच दारु च।

**129.** 'परिभ्रमन्' इति पदे प्रयुक्तकृदन्तप्रत्ययं चित्वा लिखत।

(1) क्त (2) क्त्वा (3) ल्यप् (4) शतृ

**130.** शृगालस्य कस्मात् दंष्ट्राभङ्ग: सञ्जात: ?

(1) चर्मविदारणत: (2) सुवर्णविदारणत: (3) काष्ठविदारणत: (4) वृक्षविदारणत:

**131.** शृगाल: वने परिभ्रमन् किं अपश्यत् ?

(1) राजपुरुषम् (2) रङ्गभूमिम् (3) सङ्ग्रामभूमिम् (4) राजभवनम्

**132.** 'दुन्दुभे:' इति पदे का विभक्ति: ?

(1) सप्तमी (2) पञ्चमी (3) प्रथमा (4) द्वितीया

**133.** शृगाल: कस्य शब्दं अशृणोत् ?

(1) असिकृतं शब्दं (2) दुन्दुभिकृतं शब्दं (3) वीणाकृतं शब्दं (4) तूष्ठीरकृतं शब्दं

**134.** शृगालस्य नाम किमासीत् ?

(1) लक्षायुः (2) दीर्घायुः (3) शतायुः (4) गोमायुः

**135.** 'कठोरः' इत्यस्य समानार्थकं पदं चित्वां लिखत।

(1) गुरुः (2) परुषः (3) वक्रः (4) अनम्यः

**136.** अश्विनः जन्मतः ओडियाभाषां जानाति। सः आङ्गलहिन्दी भाषे पठति। एतदाधृत्य अधोलिखितेषु असमीचीनं कथनं चिनुत –

(1) तस्य आङ्गलभाषा-अधिगमः भाषा-अधिग्रहणम् अस्ति।

(2) तस्य ओडिया-अधिगमः भाषा-अधिग्रहणम् अस्ति (Language acquisition)।

(3) तस्य हिन्दी अधिगमः भाषा-अधिगमः अस्ति।

(4) तस्य आङ्गलभाषा-अधिगमः भाषा-अधिगमः अस्ति।

**137.** करणभूत-उत्प्रेरणा (Instrumental motivations) कदा भवति ?

(1) जनाः ग्रन्थं लेखितुं भाषां शिक्षन्ते।

(2) जनाः सेवानियोजनः इत्यादयः प्रयोजनवशात् भाषां शिक्षन्ते।

(3) जनाः मूलभाषाभाषिणां सामुख्यं लब्धुं भाषां शिक्षन्ते।

(4) जनाः स्वसमुदायानां धार्मिक-सामाजिक-प्रकायार्थं भाषां शिक्षन्ते।

**138.** कृपा-करणौ यमौ भ्रातारौ मणिपुरी भाषायाः एकया विशिष्ट उपभाषया वदतः। परन्तु तयोः वाचौ भिन्ने स्तः। उपभाषया स्व-स्वविशिष्टशैलीमनुसृत्य तयोः एवविध् सम्भाषणं किं कथ्यते ?

(1) मणिपुरी भाषा (2) निजभाषा (Idiolect)

(3) उपभाषा (Dialect) (4) वाक्कर्म (Speech act)

**139.** भारतीय संविधाने आङ्गल भाषायाः का स्थितिः वर्तते ?

(1) प्राधिकारिनिकायानां भाषा (Language of Statutory bodies)

(2) राजकीयभाषा (Official Language)

(3) सहराजकीयभाषा (Associate Official Language)

(4) वैदेशिक-भाषा

**140.** एका परीक्षा या छात्रविशेषस्य सबलाबलक्षेत्रे अवगन्तुं प्रयतते सा किं कथ्यते ?

(1) आकारिक-परीक्षा (Formative test) (2) वस्तुनिष्ठ-परीक्षा (Objective test)

(3) वैधता-परीक्षा (Validity test) (4) नैदानिक-परीक्षा (Diagnostic test)

**141.** अदिती: लिट्लकारस्य नियमान् जानाति किन्तु प्रसङ्गे तस्य प्रयोगे समर्था नास्ति। कीदृश् ज्ञानं तया धार्यते ?

(1) ज्ञानस्य-अनुप्रयोग: (Application of Knowledge)

(2) भाषा-अधिग्रहण युक्ति (Language acquisition device)

(3) प्रक्रियात्मकं ज्ञानम् (Procedural Knowledge)

(4) निर्णयात्मकं ज्ञानम् (Declarative Knowledge)

**142.** भाषा-विषये किं समीचीनं नास्ति ?

(1) काश्चिद भाषा: केवलं विज्ञान-अभियान्त्रिकीविषययो: अभिव्यक्ति: कुर्वन्ति।

(2) भाषया तादात्म्यस्य (Identity) अभिव्यक्ति: भवति।

(3) भाषा इतिहासस्य संग्राहिका भवति।

(4) भाषा मानवज्ञानं सम्पादयति।

**143.** भाषा कक्षायां परियोजना कार्यसम्पादन क्रमे यथाक्रमं सन्निविष्टानि चरणानि अधोलिखितेषु चित्वा लिखत -

(1) अध्यापक छात्रौ परियोजना कार्यमुद्दिश्य स्वमत्या आयोजनं, सम्पादनं च कर्तुं शक्यौ।

(2) समूह-निर्माणं, आयोजनं (Planning), तथ्य-संग्रहणं, तथ्य-व्याख्या, प्रारूप-लेखनं, प्रकरण-अभिज्ञानं, प्रारूपस्य अन्तिमरूप-प्रदानम्

(3) समूह-निर्माणं, प्रकरण-अभिज्ञानं (identifying the topic) आयोजनं, तथ्य-संग्रहणं, तथ्य-व्याख्या, प्रारूप-लेखनं, प्रारूपस्य अन्तिमरूप प्रदानम्।

(4) समूह-निर्माणं, प्रकरणस्य अभिज्ञानं, आयोजनं, तथ्य-संग्रहणं, प्रारूप-लेखनम्, तथ्य-व्याख्या, प्रारुपस्य अन्तिमरूपप्रदानम्

**144.** श्रवणस्य अधोगामि उपागमे (Top-down approach) किं सन्निविष्टं भवति ?

(1) प्रतिवर्ण-पद-पदांश-वाक्यांश-वाक्यस्यश्रवणम्

(2) विशिष्टविस्तारान् प्रति अवधानम्

(3) सम्भाषण-पाठ-श्रव्यस्य च सारश्रवणम्

(4) पाठ-सम्भाषण-श्रव्यस्य सामान्यसन्देशश्रवणम्

**145.** सप्तमकक्षाया: एक: अध्यापक: एकं व्यक्तिमुद्दिश्य विवरणं लिखितुं स्वछात्रान् कार्यं दातुं इच्छति। स: कक्षात: बहिरागच्छति एवं वस्तुपुटकस्य सहितं एकं आपणिकं समेत्य कक्षायां आगच्छति। अध्यापक: आपणिकं सप्तमिनटयावत् तत्रैव स्थातुं निवेदयति, तदनन्तरं स: छात्रान् युगलबद्ध: भूत्वा तत्व्यक्ते: विवरणं लेखितुं कथयति। अस्मिन् गतिविधौ आपणिक: कथंविध् ज्ञायते ?

(1) सामग्री

(2) शिक्षण-साहाय्यीभूत:

(3) एक: आपणिक:

(4) गतिविधौ एक: सहभागी

**146.** सप्तम कक्षाया: एक: अध्यापक: स्वछात्रान् पाठे चित्रित-जन-समुदायानां सत्ता-आत्मरूपस्य अवबोधपूर्वकं एकं लघुलेखं पठितुं निर्दिशति। एतद्द्वारा अध्यापक: छात्राणां मध्ये किं सम्वर्धयितुं प्रयतते ?

| | |
|---|---|
| (1) साहित्यिक-कौशलम् | (2) भाषा-साक्षरता |
| (3) आलोचनात्मक-साक्षरता | (4) विश्लेषणात्मक-पठनम् |

**147.** राष्ट्रीय शिक्षा नीति : 2020 इत्यस्य अनुशंसितस्य श्रेण्यभाषाध्ययनस्य विषये अधोलिखितेषु किं सत्यम् ?

(1) श्रेण्यभाषाध्ययनं माध्यमिकस्तरे मुख्यभाषा रूपेण भवेत्।

(2) श्रेण्य (Classical) भाषाध्ययनं माध्यमिकस्तरे एक: अतिरिक्तविकल्प: भवेत्।

(3) श्रेण्यभाषाध्ययनं त्रिभाषासूत्रान्तरे एक: विकल्प: भवेत।

(4) श्रेण्यभाषाध्ययनं प्राक्-विद्यालयीयस्तरे भवेत्।

**148.** अयमेक: पाठ:। इमं पठित्वा अन्वेषयत यत् अयं पाठ: केन भाषा-पर्युक्तिना (Language Register) सम्बद्ध: अस्ति-

सहसा क्रान्ते: पश्चात्, एवंविध: परिवर्तन: सम्भावी प्रतीता। यूरोप-एशिया महादेशसहितं विश्वस्य अनेके भागे वैयक्तिक-अधिकारं समाजसत्तानियन्त्रकम् उद्दिश्य चर्चा: जाता:। भारतवर्षे राजाराममोहन राय: डेरोजियोमहोदयश्च फ्रान्सराजक्रान्तिमुद्दिश्य चर्चा कृतवन्तौ। उपनिवेशेषु घटनाचक्राणि समाजपरिवर्तनस्य एतान् विचारान् पुनर्निर्मितानि।

(1) क्रान्ति:-पर्युक्ति (Revolution register)

(2) वैज्ञानिक-पर्युक्ति (Science register)

(3) राजनीतिक-पर्युक्ति:

(4) समाज-विज्ञान-पर्युक्ति:

**149.** सुभाष, अष्टमकक्षाया: एक: अध्यापक: खेदं प्रकटयति यत् ''भाषा-आकलने सामान्यत:, ग्रहण-कौशलानि (Receptive Skills) आपेक्षित माहात्म्यं न दीयते'' ग्रहणकौशलेन तस्य कोऽभिप्राय ?

| | |
|---|---|
| (1) सम्भाषणं, लेखनं च | (2) श्रवणं, लेखनं च |
| (3) सम्भाषणं, पठनं च | (4) श्रवणं, पठनं च |

**150.** छात्रेण एतद् अवबुध्यते प्रयुज्यते च यत् भाषा तन्त्ररूपेण प्रवर्तते।

(1) प्रविधिमूलक-सामर्थ्यम् (Strategic competence)

(2) सम्प्रेषणात्मक-सामर्थ्यम् (Communicative competence)

(3) तन्त्रपरक-सामर्थ्यम् (Systemic competence)

(4) सामाजिक-भाषावैज्ञानिकसामर्थ्यम्

- o 0 o -

